योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ०४

चतुर्थः सर्गः ४

श्रीवाल्मीकिरुवाच ।

मेघगम्भीरया वाचा विश्रब्धपदसुन्दरम् ।

इदं दशरथो वाक्यमुवाच मुनिनायकम् ।। १

भगवन्ह्यस्तनेन त्वं वाक्यसंदर्भजन्मना ।

कच्चिन्मुक्तोऽसि खेदेन तपःकार्श्यातिशायिना ।। २

ह्यस्तनोक्तो य आनन्दी विविक्तो वचसां गणः ।

अमृतावर्षणेनेव तेनैवाश्वासिता वयम् ।। ३

चन्द्रांशव इवोत्सार्य तमांस्यमृतनिर्मलाः ।

अन्तःशीतलयन्त्येता महताममला गिरः ।। ४

अपूर्वाह्लाददायिन्य उच्चैस्तरपदाश्रयाः ।

अतिमोहापहारिण्यः सूक्तयो हि महीयसाम् ।। ५

आत्मरत्नावलोकैकदीपिका सरसात्मिका ।

यमाद्युक्तिलतोदेति स वन्द्यः सुजनद्रुमः ।। ६

दुरीहितं दुर्विहितं सर्व सज्जनसूक्तयः ।

प्रमार्जयन्ति शीतांशोस्तमःकाण्डमिवाङ्घ्रयः ।। ७

तृष्णालोभादयोऽस्माकं संसारनिगडा मुने ।

तवोक्त्या तनुतां याताः शरदीवासिताम्बुदाः ।। ८

संप्रवृत्ता वयं द्रष्टुमात्मानमपकल्मषम् ।

रसाञ्जनानीतदृशो जात्यन्धा इव काञ्चनम् ।। ९

संसारवासनानाम्नी मिहिका हृदयाम्बरे ।

प्रवृत्ता तनुतां गन्तुं त्वदुक्तिशरदेव नः ।। १०

मुने मन्दारमञ्जर्यस्तरङ्गा वामृताम्भसः ।

न तथा ह्लादयन्त्यन्तर्यथोदारधियां गिरः ।। ११

यद्यद्राघव संयाति महाजनसपर्यया ।

दिनं तदिह सालोकं शेषास्त्वन्धा दिनालयः ।। १२

राम राजीवपत्राक्ष प्रकृतार्थमिहाव्ययम् ।

मुनिमाबोधय पुनः प्रसादे समवस्थितम् ।। १३

इत्युक्तो भूभृता तत्र रामाभिमुखमास्थितः ।

उवाचेदमुदारात्मा वसिष्ठो भगवान्मुनिः ।। १४

श्रीवसिष्ठ उवाच ।

राघव स्वकुलैकेन्दो यन्मयोक्तं महामते ।

कच्चित्स्मरसि वाक्यार्थं पूर्वापरविचारितम् ।। १५

उत्पत्तीनां विचित्राणां सत्त्वादिगुणभेदतः ।

कच्चित्स्मरसि सर्वासां विभागमरिमर्दन ।। १६

कश्चित्सर्वमसर्वं च सदसच्च सदोदितम् ।

रूपं स्मरसि वेत्स्येव विविक्तं परमात्मनः ।। १७

यथेदमुदितं विश्वं विश्वेशादेव चेश्वरात् ।

कच्चित्स्मरसि तत्साधो साधुवादैकभाजन ।। १८

रूपं कच्चिदविद्याया बलाद्भङ्गुरमाततम् ।

अनन्तमन्तवच्चैव सम्यक्स्मरसि सन्मते ।। १९

चित्तमेव नरो नान्यदिति यत्प्रतिपादितम् ।

लक्षणादिविचारेण कच्चित्स्मरसि साधु तत् ।। २०

वाक्यार्थश्चाखिलः कच्चित्त्वया राम विचारितः ।

ह्यस्तनस्य विचारस्य रात्रौ हृदि निवेशितः ।। २१

भूयोभूयः परामृष्टं हृदये सुनियोजितम् ।

प्रयोजनं फलत्युच्चैर्न हेलाहतसंस्थितेः ।। २२

भाजनं त्वं विविक्तानां वचसां शुद्धिशालिनाम् ।

विविक्तहृदयः कण्ठे मुक्तानामिव राघव ।। २३

श्रीवाल्मीकिरुवाच ।

कमलासनपुत्रेण मुनिना समहौजसा ।

एवं वितीर्णावसरो रामो वाक्यमुवाच ह ।। २४

श्रीराम उवाच ।

भगवन्सर्वधर्मज्ञ तवैवैतद्विजृम्भितम् ।

यदहं परमोदारो बुद्धवान्वचनं तव ।। २५

यदादिशसि तत्सर्वं तथैव न तदन्यथा ।

अपास्तनिद्रेण मया वाक्यार्थो हृदि चिन्तितः ।। २६

भवान्धकारक्षतये भवतोक्तिविवस्वता ।

ह्यः प्रसादितमाह्लादि वाग्रश्मिपटलं प्रभो ।। २७

तदतीतमदीनात्मन्सर्वमन्तःकृतं मया ।

रम्यं पुण्यं पवित्रं च रत्नवृन्दमिवान्वितम् ।। २८

हितानुबन्धि हृद्यं च पुण्यमानन्दसाधनम् ।

शिरसा ध्रियते कैर्नो सिद्धैस्त्वदनुशासनम् ।। २९

प्रतिक्षिपन्तः संसारमिहिकावरणं वयम् ।

प्रसन्नास्त्वत्प्रसादेन वर्षान्त इव वासराः ।। ३०

आपातमधुरारम्भं मध्ये सौभाग्यवर्धनम् ।

अनुत्तमफलोदर्कं पुण्यं त्वदनुशासनम् ।। ३१

विकासिसितमम्लानमाह्लादितशुभाशुभम् ।

त्वद्वचःकुसुमं नित्यं श्रीमत्फलदमस्तु नः ।। ३२

सकलशास्त्रविचारविशारद प्रसृतपुण्यजलैकमहाह्रद ।

भज भृशं विततव्रत संप्रति प्रसृततां हतकिल्बिष संततिम् ।। ३३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मोक्षोपाये उपशमप्रकरणे राघवप्रश्नो नाम चतुर्थः सर्गः ।। ४ ।।